# ॥ वैयाकरणसिद्धान्तकौमुदी ॥

## परिभाषाप्रकरणम् (२)

०६.०८.२०१०

# पुनरावर्तनम्

- परिभाषा,
- इको गुणवृद्धी,
- अचश्च

# ३६. आद्यन्तौ टकितौ (१.१.४६)

- पदद्वयम् ।
- टिट्कितौ यस्योक्तौ तस्य क्रमादाद्यन्तावयवौ स्तः ।
-
- टित् – ट् इत् यस्य सः
- कित् – क् इत् यस्य सः

- लुङ्-लङ्-लृङ्क्ष्वडुदात्तः – एषु लकारेषु धातोः अट्-आगमः स्यात् ।
- अट् – टकारः इत् (हलन्त्यम्) । अतः अयं 'टित्' ।
- भू लङ्
- अ भू लङ्
- अभवत्

- भियो हेतुभये षुक् – भी धातोः षुक् आगमः स्यात् ।
- षुक् – ककारः इत् । तस्मादयं कित् ।
- भी णिच्
- भी ष् णिच्
- भीषयति

# ३७. मिदचोऽन्त्यात्परः (१.१.४७)

- चत्वारि पदानि । मित् अचः अन्त्यात् परः ।
- अचः इति षष्ठ्यन्तम् । अचां मध्ये योऽन्त्यः तस्मात् परः तस्यैव अन्तावयवः मित् स्यात् ।

- नपुंसकस्य झलचः - नपुंसकलिङ्गे प्रातिपदिकस्य 'नुम्' आगमः भवति ।
- नुम् – मकारः इत् । तस्मादयं मित् (म् इत् यस्य सः)।

| | |
|---|---|
| ज्ञान इ | मनस् इ |
| ज् ञ् आ न् अ इ | म् अ न् अ स् इ |
| ज् ञ् आ न् अन् इ | म् अ न् अन् स् इ |
| ज्ञानन् इ | मनन्स् इ |
| ज्ञानानि | मनान्स् इ |
| | मनांसि |

# ३८. षष्ठी स्थानेयोगा (१.१.४९)

- पदद्वयम् ।
- अनिर्धारितसम्बन्धविशेषा षष्ठी स्थानेयोगा बोध्या ।
- 
- एकशतं षष्ठ्यर्थाः । सामान्यतः षष्ठ्यर्थः सम्बन्धः इत्युच्यते ।
- शब्दस्य शब्देन सह त्रयः सम्बन्धाः – आनन्तर्यम्, सामीप्यम्, स्थानम् ।
- व्याकरणशास्त्रे षष्ठ्याः स्थाननिरूपितसम्बन्धः अर्थः ।

- **स्थानं च प्रसङ्गः** = उच्चारणप्रसङ्गः ।
- इको यणचि – इकः इति षष्ठी । इकः स्थाने, अर्थात्, उच्चारणप्रसङ्गे, यण् उच्चार्यते ।
-
- अनिर्धारित-सम्बन्ध-विशेषा – यत्र अन्यः कश्चन सम्बन्धः कथञ्चित् निर्धारितः, तत्र इयं परिभाषा न प्रवर्तते । ’अनियमे नियमकारिणी परिभाषा’ । यत्र षष्ठ्याः अर्थः न निश्चितः, तत्रैव अनया परिभाषया ‘स्थाने’ इत्यर्थो लभ्यते ।

# ३९. स्थानेऽन्तरतमः (१.१.५०)

- पदद्वयम् । स्थाने, अन्तरतमः ।
- प्रसङ्गे सति सदृशतमः आदेशः स्यात् ।
- 
- दधि+अत्र (इको यणचि – इकः स्थाने यण् स्यात् ।)
- इकारस्य स्थानम् – तालु
- यण् = य् – तालु, व्-दन्तोष्ठम्, र्-मूर्धा, ल्-दन्ताः
- दध्यत्र

# सादृश्यं चतुर्विधम्

## १) स्थानतः सादृश्यम् –

- इको यणचि ।

| | | |
|---|---|---|
| इ – तालु | य् – तालु | (इ-चु-य-शानां तालु) |
| उ – ओष्ठौ | व् – दन्तोष्ठम् | (उ-पु-उपध्मानीयानाम् ओष्ठौ) |
| ऋ – मूर्धा | र् – मूर्धा | (ऋ-टु-र-षाणां मूर्धा) |
| ऌ – दन्ताः | ल् – दन्ताः | (ऌ-तु-ल-सानां दन्ताः) |

## १) अर्थतः सादृश्यम् –

- पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु ।
- पद्-दत्-नस्-मास्-हृत्-निश्-असन्-यूषन्-दोषन्-यकन्-शकन्-उदन्-आसन् इति आदेशाः । स्थानी न निर्दिष्टः ।
- आसन् = आसन-शब्दस्य आदेशः, उत आस्य-शब्दस्य?
- अर्थतः सादृश्यात् आस्य-शब्दस्यैव आसन् आदेशः । (हव्या जुह्वान आसनि, आसन्यं प्राणमूचुः)

१) **गुणतः सादृश्यम् –**

- वाग्+हरिः ('झयो होऽन्यतरस्याम्' इति पूर्वसवर्णः आदेशः)
- पूर्वस्य=गकारस्य सवर्णाः पञ्च – क्, ख्, ग्, घ्, ङ्
-
- हकारस्य गुणाः (=बाह्यप्रयत्नाः) – संवारः, नादः, घोषः, महाप्राणः ।

- क् – विवारः, श्वासः, अघोषः, अल्पप्राणः ।
- ख् - विवारः, श्वासः, अघोषः, महाप्राणः ।
- ग् - संवारः, नादः, घोषः, अल्पप्राणः ।
- घ् - संवारः, नादः, घोषः, महाप्राणः ।
- ङ् - संवारः, नादः, घोषः, अल्पप्राणः ।
-
- गुणतः सादृश्यात् हकारस्य घकारः आदेशः ।
- वाग्घरिः ।

## १) प्रमाणतः सादृश्यम् –

- अदसोऽसेर्दादु दो मः – अदस्-शब्दस्य दकारस्य मकारः आदेशः, दकारात् परस्य उकारः आदेशः ।
-

| | |
|---|---|
| अदस् औ | अदस् अम् |
| अद अ औ (त्यदादीनामः) | अद अ अम् |
| अद औ (अतो गुणे) | अद अम् |
| अदौ(वृद्धिरेचि) | अदम् (अमि पूर्वः) |
| अद्-औ [दीर्घः] | अद्-अम् [ह्रस्वः] |
| अम्-ऊ [दीर्घः] | अम्-उम् [ह्रस्वः] |
| अमू | अमुम् |

- मिदेर्गुणः – मिद्-धातोः गुणः स्यात् ।
- मिद् धातोः इकः गुणः स्यात् (इको गुणवृद्धी)
- मिद् धातोः इकः स्थाने गुणः स्यात् (षष्ठी स्थानेयोगा)
- गुणः = अ, ए, ओ ।
- मिद्-धातोः इक् = इकारः ।
- इकारस्य स्थानम् - तालु (इचुयशानां तालु), प्रमाणम् - ह्रस्वः
- अकारस्य – स्थानं कण्ठः (अकुहविसर्जनीयानां कण्ठः), प्रमाणम् - ह्रस्वः
- एकारस्य – स्थानं कण्ठतालु (एदैतोः कण्ठतालु), प्रमाणम् - दीर्घः
- ओकारस्य – स्थानं कण्ठोष्ठम् (ओदौतोः कण्ठोष्ठम्), प्रमाणम् - दीर्घः

# यत्रानेकविधमान्तर्यं तत्र स्थानतः आन्तर्यं बलीयः (प १४)

- तस्माद् इकारस्य स्थाने गुणः एकारः ।
- मेद्यति ।